योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०७८

अष्टसप्ततितमः सर्गः ७८

श्रीवसिष्ठ उवाच ।

एवं बहूनि वर्षाणि मिथुनं निर्भरस्पृहम् ।

रेमे यौवनलीलाभिरमन्दाभिर्दिने दिने ।। १

अथ यातेषु बहुषु वर्षेष्वावृत्तिशालिषु ।

शनैर्गलिततारुण्ये भिन्नकुम्भादिवाम्भसि ।। २

तरङ्गनिकराकारभङ्गुरव्यवहारिणि ।

पातः पक्वफलस्येव मरणं दुर्निवारणम् ।। ३

हिमाशनिरिवाम्भोजे जरा निपतनोन्मुखी ।

आयुर्गलत्यविरतं जलं करतलादिव ।। ४

प्रावृषीव लतातुम्बी तृष्णैका दीर्घतां गता ।

शैलनद्या रय इव संप्रयात्येव यौवनम् ।। ५

इन्द्रजालमिवासत्यं जीवनं जीर्णसंस्थिति ।

सुखानि प्रपलायन्ते शरा इव धनुश्च्युताः ।। ५

पतन्ति चेतो दुःखानि तृष्णा गृध्र इवामिषम् ।

बुद्बुदः प्रावृषीवाप्सु शरीरं क्षणभङ्गुरम् ।। ७

रम्भागर्भ इवासारो व्यवहारो विचारगः ।

सत्वरं युवता याति कान्तेवाप्रियकामिनः ।। ८

बलादरतिरायाता वैरस्यमिव पादपम् ।

तदिह स्याच्छुभाकारं स्थिरं किमतिशोभनम् ।। ९

यदासाद्य पुनश्चेतो दशासु न विदूयते ।

इति निर्णीय युग्मं तत्संसारव्याधिभेषजम् ।। १०

चिरं विचारयामास शास्त्रमध्यात्मसंमतम् ।
आत्मज्ञानैकमात्रेण संसृत्याख्या विषूचिका ।। ११
संशाम्यतीति निश्चित्य तावास्तां तत्परायणौ ।
तच्चित्तौ तद्गतप्राणौ तन्निष्ठौ तद्विदाश्रयौ ।। १२
तदा तदर्चनपरौ तदीहौ तौ विरेजतुः ।
तत्रैवातिघनाभ्यासौ बोधयन्तौ परस्परम् ।। १३
तत्प्रीतौ तत्समारम्भावन्योन्यं तौ बभूवतुः ।
अथ साविरतं राम रमणीयपदक्रमान् ।। १४
श्रुत्वाध्यात्मविदां वक्राच्छास्त्रार्थांस्तारणक्षमान् ।
इत्थं विचारयामास स्वमात्मानमहर्निशम् ।। १५
अव्यापृता व्यापृता वा धिया धवलयेद्धया ।
प्रेक्षे तावत्स्वमात्मानं किमहं स्यामिति स्वयम् ।। १६
कस्यायमागतो मोहः कथमभ्युत्थितः क्व वा ।
देहस्तावज्जडो मूढो नाहमित्येव निश्चयः ।। १७
आबालमेतत्संसिद्धं मतौ चैवानुभूयते ।
कर्मेन्द्रियगणश्चास्मादभिन्नावयवात्मकः ।। १८
अवयवावयविनोर्न भेदो जड एव च ।
बुद्धीन्द्रियगणोऽप्येवं जड एवेति दृश्यते ।। १९
प्रेर्यते मनसा यस्माद्यष्ट्येव भुवि लोष्टकः ।
मनश्चैव जडं मन्ये संकल्पात्मकशक्ति यत् ।। २०
क्षेपणैरिव पाषाणः प्रेर्यते बुद्धिनिश्चयैः ।
बुद्धिर्निश्चयरूपैवं जडा सत्तैव निश्चयः ।। २१
खातेनेव सरिन्नूनं साऽहंकारेण वाह्यते ।
अहंकारोऽपि निःसारो जड एव शवात्मकः ।। २२
जीवेन जन्यते यक्षो बालेनेव भ्रमात्मकः ।
जीवश्च चेतनाकाशो वातात्मा हृदये स्थितः ।। २३

सुकुमारोऽन्तरन्येन केनापि परिजीवति ।

अहो नु ज्ञातमेतेन चेत्योल्लेखकलङ्किना ।। २४

जीवो जीवति जीर्णेन चिद्रूपेणात्मरूपिणा ।

चेत्यभ्रमवता जीवश्चिद्रूपेणैव जीवति ।। २५

आमोदः पवनेनेव खातेनेव सरिद्रयः ।

असत्यजडचेत्यांशचयनाच्चिद्वपुर्जडम् ।। २६

महाजलगतो ह्यग्निरिव रूपं स्वमुज्झति ।

सद्वासद्वा यदाभाति चित्समाधौ सति स्वतः ।। २७

स्वरूपमलमुत्सृज्य तदेव भवति क्षणात् ।

एवं चिद्रूपमप्येतच्चेत्योन्मुखतया स्वयम् ।। २८

जडं शून्यमसत्कल्पं चैतन्येन प्रबोध्यते ।

इति संचिन्त्य चूडाला केनैषा चित्प्रचेतनी ।। २९

इति संचिन्तयामास चिरायेत्थं व्यबुध्यत ।

अहो नु चिरकालेन ज्ञातं ज्ञेयमनामयम् ।। ३०

यद्वै विज्ञेयतां कृत्वा न कश्चिद्धीयते पुनः ।

एते हि चिद्विलासान्ता मनोबुद्धीन्द्रियादयः ।। ३१

असन्तः सर्व एवाहो द्वितीयेन्दुपदस्थिताः ।

महाचिदेकैवास्तीह महासत्तेति योच्यते ।। ३२

निष्कलङ्का समा शुद्धा निरहंकाररूपिणी ।

शुद्धसंवेदनाकारा शिवं सन्मात्रमच्युतम् ।। ३३

सकृद्विभाता विमला नित्योदयवती सदा ।

सा ब्रह्मपरमात्मादिनामभिः परिगीयते ।। ३४

चेत्यचेतनचित्तादि नास्या भिन्नं न मानतः ।

तयैषा चैत्यते चिच्छ्रीः सैषाद्या चिदिति स्मृता ।। ३५

अचेत्यं यदिदं चित्त्वं तत्तस्या रूपमक्षतम् ।

मनोबुद्धीन्द्रियाद्यर्थरूपैः सैव विजृम्भते ।। ३६

तरङ्गकणकल्लोलकलनेयं चिदात्मनि ।
जगद्रूपपदार्थानां सत्ता स्फुरति मातरि ।। ३७
यदिदं तत्परं रूपं तस्याः खलु महाचितेः ।
शुद्धचिन्मणिवत्सा हि सेयं समसमोदिता ।। ३८
अनन्ययैव या शक्तया जगज्जृम्भिकया स्थिता ।
सत्ता मायातिरेकेण नान्या संभवतीह हि ।। ३९
विचित्रतेव भाण्डानां ननु हेमतया यथा ।
सा तथोदेति तद्रूपमात्मानं चेतति स्वयम् ।। ४०
स्वचित्तेन द्रवत्वेन तरङ्गादित्वमम्बुषु ।
महाचितौ जगच्चित्तादुदेतीवानुदेत्यपि ।। ४१
तदात्मैव यथा यातो रूपवान् जलधौ द्रवात् ।
एवं चिन्मात्रमेवाहमनहंभावमाततम् ।। ४२
न तस्य जन्ममरणे न तस्य सदसद्गती ।
न नाशः संभवत्यस्य चिन्मात्रनभसः क्वचित् ।। ४३
अच्छेद्योऽयमदाह्योऽयं चिदादित्योऽतिनिर्मलः ।
आहो नु चिरकालेन शान्तास्मि परिनिर्वृता ।। ४४
निर्वामि भ्रमनिर्मुक्तमासे निर्मन्दराब्धिवत् ।
असदाभासमत्यच्छमनन्तमजमच्युतम् ।। ४५
आत्माकाशमनाबाधममलं परमं चिरम् ।
अनन्तमिदमाकाशं फलौघाश्चाफलादिकाः ।। ४६
सुरासुरयुतं विश्वमेतन्मयमकृत्रिमम् ।
पुंस्त्वकर्ममयी सेना सर्वं मृन्मात्रकं यथा ।। ४७
द्रष्टृदृश्यमयी सत्ता चिन्मात्रैक्यमयी तथा ।
इदमैक्यमिदं द्वित्वमहं नाहमितीति च ।। ४८
क इव भ्रमसंमोहः कथं कस्य कुतः क्व वा ।
स्वमनन्तमनायासमुपशान्तास्मि संस्थिता ।। ४९

निर्वाणपरिनिर्वाणा गतमासे गतज्वरम् ।

अचेतनं चेतन वा योऽयमाभाति चेतति ।। ५०

भासमानात्म तद्रूपं खं महाचिति संस्थितम् ।

नेदं नाहं न चान्यच्च न भावाभावसंभवः ।

शान्तं सर्वं निरालम्बं केवलं संस्थितं परम् ।। ५१

इत्थंविचारणपरा परमप्रबोधा-

द्बुद्ध्वा यथास्थितमिदं परमात्मतत्त्वम् ।

संशान्तरागभयमोहतमोविलासा

शान्ता बभूव शरदम्बरलेखिकेव ।। ५२

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पूर्वार्धे चूडालाप्रबोधो नामाष्टसप्ततितमः सर्गः ।। ७८ ।।